कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ प्रथम काण्डे द्वितीयः प्रश्नः॥

हरिः ओम्॥ आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैनग्ग् स्वधिते मैनग्ं हिग्ंसीर्देवश्रूरेतानि प्र वपे स्वस्त्युत्तराण्यशीयाऽऽपो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत्प्र वहन्तु रिप्रमुदाभ्यः शुचिरा पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयोऽसि वर्चोधा असि वर्चो [१] मयि धेहि वृत्रस्य कनीनिकाऽसि चक्षुष्पा असि चक्षुर्मे पाहि चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिस्तस्य ते पवित्रपते पवित्रेण यस्मै कं पुने तच्छकेयमा वो देवास ईमहे सत्यधर्माणो अध्वरे यद्वो देवास आगुरे यज्ञियासो हवामह इन्द्राग्नी द्यावापृथिवी आप ओषधीस्त्वं दीक्षाणामधिपतिरसीह मा सन्तं पाहि॥[२]

वर्च ओषधीरष्टौ च ॥1.2.1॥

आकूत्यै प्रयुजेऽग्नये स्वाहा मेधायै मनसेऽग्नये स्वाहा दीक्षायै तपसेऽग्नये स्वाहा सरस्वत्यै पूष्णेऽग्नये स्वाहाऽऽपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाह क्स्र्सामयोः शिल्पे स्थस्ते वामा रभे ते मा [३] पातमाऽस्य यज्ञस्योदृच इमां धियग्ं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सग्ं

शिशाधि ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावग्ं रुहेमोर्गस्याङ्गिरस्यूर्णम्रदा ऊर्जं मे यच्छ पाहि मा मा मा हिग्ंसीर्विष्णोः शर्माऽसि शर्म यजमानस्य शर्म मे यच्छ नक्षत्राणां माऽतीकाशात्पाहीन्द्रस्य योनिरसि [४] मा मा हिग्ंसीः कृष्यै त्वा सुसस्यायै सुपिप्पलाभ्यस्त्वौषधीभ्यः सूपस्था देवो वनस्पतिरूर्ध्वो मा पाह्योदृचः स्वाहा यज्ञं मनसा स्वाहा द्यावापृथिवीभ्याग् स्वाहोरोरन्तरिक्षाथ्स्वाहा यज्ञं वातादा रभे॥[५]

मा योनिरसि त्रिग्ंशच्च ॥1.2.2॥

दैवीं धियं मनामहे सुमृडीकामभिष्टये वर्चोधां यज्ञवाहसग्ं सुपारा नो असद्वशे। ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहाऽग्ने त्वग्ं सु जागृहि वयग्ं सु मन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः। त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं [६] यज्ञेष्वीड्यः॥ विश्वे देवा अभि मामाऽववृत्रन्पूषा सन्या सोमो राधसा देवः सविता वसोर्वसुदा वा रास्वेयथ्सोमाऽऽभूयो भर मा पृणन्पूर्त्या वि राधि माऽहमायुषा चन्द्रमसि मम भोगाय भव वस्त्रमसि मम भोगाय भवोस्राऽसि मम भोगाय भव हयोऽसि मम भोगाय भव [७] छागोऽसि मम भोगाय भव मेषोऽसि मम भोगाय भव वायवे त्वा वरुणाय त्वा निर्ऋत्यै त्वा रुद्राय त्वा देवीरापो अपां नपाद्य ऊर्मिर् हविष्य इन्द्रियावान्मदिन्तमस्तं वो माऽव क्रमिषमच्छिन्नं तन्तुं पृथिव्या अनु गेषं भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्त्वथेमव स्य वर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीर एदमगन्म देवयजनं पृथिव्या विश्वे देवा यदजुषन्त पूर्व ऋक्सामाभ्यां यजुषा सन्तरन्तो

रायस्पोषेण समिषा मदेम॥[८]

आ त्वग्ं हर्योऽसि मम भोगाय भव स्य पञ्चविग्ंशतिश्च ॥1.2.3॥

इयं ते शुक्र तनूरिदं वर्चस्तया सं भव भ्राजं गच्छ जूरसि धृता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहा शुक्रमस्यमृतमसि वैश्वदेवग्ं हविः सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकां यदेत शेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनाऽसि धीरसि दक्षिणा [९] ऽसि यज्ञियासि क्षत्रियाऽस्यदितिरस्युभयतः शीर्ष्णी सा नः सुप्राची सुप्रतीची सं भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः पात्विन्द्रा याध्यक्षायानु त्वा माता मन्यतामनु पिताऽनु भ्राता सगभ्र्योऽनु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमग्ं रुद्रस्त्वाऽऽवर्तयतु मित्रस्य पथा स्वस्ति सोम सखा पुनरेहि सह रय्या॥[१०]

दक्षिणा सोमसखा पञ्च च ॥1.2.4॥

वस्व्यसि रुद्राऽस्यदितिरस्यादित्याऽसि शुक्राऽसि चन्द्राऽसि बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिरा चिकेतु पृथिव्यास्त्वा मूर्धन्ना जिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा परिलिखितग्ं रक्षः परिलिखिता अरातय इदमहग्ं रक्षसो ग्रीवा अपि कृन्तामि योऽस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवा [११] अपि कृन्ताम्यस्मे रायस्त्वे रायस्तोते रायः सं देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव संदृशि माऽहग्ं रायस्पोषेण वि योषम्॥[१२]

अस्य ग्रीवा एकान्न त्रिग्ं शच्च ॥1.2.5॥

अग्ंशुना ते अग्ंशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतोऽमात्योऽसि शुक्रस्ते ग्रहोऽभि त्यं देवग्ं सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसग्ं रत्नधामभि प्रियं मतिमूर्ध्वा यस्याऽमतिर्भा अदिद्युतथ्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवः। प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनु प्राऽणिहि प्रजास्त्वामनु प्राणन्तु॥[१३]

अमि सप्त च ॥1.2.6॥

सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहग्ं शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणाऽमृतममृतेन सम्यत्ते गोरस्मे चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणाम्यस्मे ते बन्धुर्मयि ते रायः श्रयन्तामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा इन्द्रस्योरुमा विश दक्षिणमुशन्नुशन्तग्ग् स्योनः स्योनग्ग् स्वान भ्राजाऽङ्गारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्न्॥[१४]

ऊरुं द्वाविग्ंशतिश्च ॥1.2.7॥

उदायुषा स्वायुषोदोषधीनाग्ं रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताग्ं अनु। उर्वन्तरिक्षमन्विह्यदित्याः सदोऽस्यदित्याः सद आ सीदाऽस्तभ्नाद्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आऽसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु [१५]

ऋतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधाथ्सोममद्रावुदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमसि प्रत्यस्तो वरुणस्य पाशः॥[१६]

हृथ्सु पञ्चत्रिग्ंशच्च ॥1.2.8॥

प्र च्यवस्व भुवस्पते विश्वान्यभि धामानि मा त्वा परिपरी विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरा दघच्छयेनो भूत्वा परा पत यजमानस्य नो गृहे देवैः सग्ग्स्कृतं यजमानस्य स्वस्त्ययन्यस्यपि पन्थामगस्महि स्वस्ति गामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतग्ं सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शग्ंसत वरुणस्य स्कम्भनमसि वरुणस्य स्कम्भसर्जनमस्युन्मुक्तो वरुणस्य पाशः॥ [१७]

मित्रस्य त्रयोविग्ंशतिश्च ॥1.2.9॥

अग्नेरातिथ्यमसि विष्णवे त्वा सोमस्याऽऽतिथ्यमसि विष्णवे त्वाऽतिथेरातिथ्यमसि विष्णवे त्वाऽग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा श्येनाय त्वा सोमभृते विष्णवे त्वा या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यानदित्याः सदोऽस्यदित्याः सद आ [१८] सीद वरुणोऽसि धृतव्रतो वारुणमसि शंयोर्देवानाग्ं सख्यान्मा देवानामपसश्छिथ्स्मह्यापतये त्वा गृह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि

शाक्वराय त्वा गृह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णाम्यनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिपा अनभिशस्तेऽन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुपगेषग्ं सुवितेमा धाः॥[१९]

आ मैकंच ॥1.2.10॥

अग्ंशुरग्ंशुस्ते देव सोमाऽऽप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाऽऽप्यायय सखीन्थ्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीयेष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि [२०] या तव तनूरियग्ं सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया रजाशया हराशया तनूर्वर्षिष्ठा गह्वरेष्ठोऽग्रं वचो अपावधीं त्वेषं वचो अपावधीग् स्वाहा॥[२१]

त्वयि चत्वारिग्ंशच्च ॥1.2.11॥

वित्तायनी मेऽसि तिक्तायनी मेऽस्यवतान्मा नाथितमवतान्मा व्यथितं विदेरग्निर्नभो नामाऽग्ने अङ्गिरो योऽस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेऽनाधृष्टं नाम यज्ञियं तेन त्वाऽऽदधेऽग्ने अङ्गिरो यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाम्ने हि यत्तेऽनाधृष्टं नाम [२२] यज्ञियं तेन त्वाऽऽदधे सिग्ंहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतां ध्रुवाऽसि देवेभ्यः शुन्धस्व देवेभ्यः शुम्भस्वेन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु मनोजवास्त्वा पितृभिर्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु

विश्वकर्मा त्वाऽऽदित्यैरुत्तरतः पातु सिग्ंहीरसि सपत्नसाही स्वाहा सिग्ंही रसि सुप्रजावनिः स्वाहा सिग्ंही [२३] रसि रायस्पोषवनिः स्वाहा सिग्ंहीरस्यादित्यवनिः स्वाहा सिग्ंहीरस्या वह देवान्देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा विश्वायुरसि पृथिवीं दृग्ंह ध्रुवक्षिदस्यन्तरिक्षं दृग्ंहाऽच्युतक्षिदसि दिवं दृग्ंहाऽग्ने र्भस्माऽस्यग्नेः पुरीषमसि॥[२४]

नाम सुप्रजावनिः स्वाहा सिग्ंहीः पञ्चत्रिग्ंशच्च ॥1.2.12॥

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥ सुवाग्देव दुर्याग्ं आ वद देवश्रुतौ देवेष्वा घोषेथामा नो वीरो जायतां कर्मण्यो यग्ं सर्वेऽनुजीवाम यो बहूनामसद्वशी। इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य [२५] पाग्ंसुर इरावती धेनुमती हि भूतग्ं सूयवसिनी मनवे यशस्ये। व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः॥ प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जीह्वरतमत्र रमेथां वर्ष्मन् पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्र यच्छ [२६] दक्षिणादोत सव्यात्॥ विष्णोर्नुकं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाग्ंसि यो अस्कभायदुत्तरग्ं सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोः श्ञ्श्नाप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा॥[२७]

अस्य यच्छैकान्न चत्वारिग्ंशच्च ॥1.2.13॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाग्ं इभेन। तृष्वीमनु प्रसितिं द्रूणानोऽस्ताऽसि विध्य रक्षसस्तपिष्ठैः॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः। तपूग्ं ष्यग्ने जुह्वा पतङ्गानसंदितो वि सृज विष्वगुल्काः॥ प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः। यो नो दूरे अघशग्ंसो [२८] यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत्॥ उदग्ने तिष्ठ प्रत्याऽऽतनुष्व न्यमित्राग्ं ओषतात्तिग्महेते। यो नो अरातिग्ं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम्॥ ऊर्ध्वो भव प्रति विध्याऽध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने। अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून्॥ स ते [२९] जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत्। विश्वान्यस्मैसुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत्॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः। पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना साऽसदिष्टिः॥ अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरता [३०] मियं गीः। स्वश्चास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून्॥ इह त्वा भूर्या चरे दुप त्मन्दोषावस्तर्दीदिवाग्ं समनु द्यून्। क्रीडन्तस्त्वा सुमनसः सपेमाऽभि द्युम्ना तस्थिवाग्ंसो जनानाम्॥ यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन। तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत्॥ महो रुजामि [३१] बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय। त्वं नो अस्य वचसश्चिकिद्धि होतर्य विष्ठ सुक्रतो दमूनाः॥ अस्वप्नज स्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः। ते पायवः सध्रियञ्चो निषद्याऽग्ने तव नः पान्त्वमूर॥ ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन्। ररक्ष तान्थ्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो ना ह [३२] देभुः॥ त्वया वयग्ं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्। उभा

शग्ंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण॥ अया ते अग्ने समिधा विधेम प्रति स्तोमग्ं शस्यमानं गृभाय। दहाऽशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्॥ रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रतिष्ठमुप यामि शर्म। शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा [३३] स रिषः पातु नक्तम्॥ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा। प्राऽदेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे॥ उत स्वानासो दिवि षन्त्वग्नेस्तिग्मायुधा रक्षसे हन्तवा उ। मदे चिदस्य प्र रुजन्ति भामा न वरन्ते परिबाधो अदेवीः॥[३४]

अघशग्ंसस्स ते जरताग्ं रुजामि ह दिवैक चत्वारिग्ंशच्च ॥34॥

आप उन्दन्त्वाकूत्यै दैवीमियं ते वस्यस्यग्ं शुना ते सोमंत उदायुषा प्र च्यवस्वाऽग्ने रातिथ्यमग्ं शुरग्ं शुर्वित्तायनी मेऽसि युञ्जते कृणुष्व पाजश्चतुर्दश ॥1.2.14॥

आपो वस्व्यसि या तवेयङ्गीश्चतुस्त्रिग्ंशत् ॥34॥

आप उन्दन्त्वदेवीः॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति प्रथमकाण्डे द्वितीयः प्रश्नः॥